श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमाला - ३

# वाक्यार्थज्योतिः

# Vākyārthajyotiḥ

अङ्कः - 1 वर्षः - 2014-15

प्रधानसम्पादकः

प्रो. अर्कनाथः चौधरी

सम्पादकौ

डॉ. ललितकुमारः पटेलः

डॉ. जानकीशरणः आचार्यः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी

वेरावलम्

Scanned with CamScanner

श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमाला-३

# वाक्यार्थज्योतिः

अङ्कः - १ वर्षः - २०१४-१५

प्रधानसम्पादकः
**प्रो. अर्कनाथः चौधरी**

सम्पादकौ
**डॉ. ललितकुमारः पटेलः**
**डॉ. जानकीशरणः आचार्यः**

**श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्**

Scanned with CamScanner

प्रकाशकः -
डॉ. दशरथः जादवः
कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
राजेन्द्रभुवन रोड, वेरावलम् - ३६२ २६६
गीर-सोमनाथजनपदम्, गुजरातम्
दूरभाषः - ०२८७६-२४४५३२, फेक्स : २४४४१७
E-mail: sssu.veraval@gmail.com
www.shreesomnathsanskrituniversity.info

समन्वयकः -
डॉ. कार्तिकपण्ड्या
संशोधनाधिकारी
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

*© Shree Somnath Sanskrit University, 2017*

प्रथमं संस्करणम् - जनवरी - २०१७

प्रतयः - ३५०

**ISBN** - 978-93-83097-19-7

मूल्यम् - रु. २५०/-

मुद्रकः - जलाराम ग्राफिक्स एन्ड ओफसेट
परमहंस अेपार्टमेन्ट के पास,
होटल कावेरी के पीछे, एस.टी.रोड, वेरावल-३६२ २६६
जि. गीर सोमनाथ, गुजरात (भारत)
दूरभाष : (०२८७६) २२१८६१

Scanned with CamScanner

Shree Somanth Sanskrit University Grantha Series - 3

# Vākyārthajyotiḥ

Issue - 1 Year - 2014-15

Chief-Editor
**Prof. Ark Nath Chaudhary**

Editors
**Dr. Lalitkumar Patel**
**Dr. Janakisharan Aacharya**

१२६६

**Shree Somanth Sanskrit University - Veraval**

Scanned with CamScanner

**Published by:**

**Dr. Dashrath Jadav**
The Registrar
Shree Somnath Sanskrit University,
Rajendra Bhuvan Road, Veraval - 362 266.
Dist.: Gir-Somnath, Gujarat, India.
Phone : 02876-244532, Fax: 02876-244417
E-mail: sssu.veraval@gmail.com
www.shreesomnathsanskrituniversity.info

**Co-ordinator:**

**Dr. Kartik Pandya**
Research Officer
Shree Somnath Sanskrit University, Veraval

© *Shree Somnath Sanskrit University, 2017*

All rights reserved. No part of this publication may be reproduced, stored in a retrieval system or transmitted in any form or by any means, electronic or mechanical, including photocopying, recording or otherwise, without the written permission from the publisher.

**Edition** : First

**Year** : January, 2017

**Copies** : 350

**ISBN** : 978-93-83097-19-7

**Price** : Rs. 250/-

**Printed by** : JALARAM GRAPHICS & OFFSET
Nr. Paramhans Aprtemtn, B/h. Hotel Kaveri,
S. T. Road, Veraval - 362 266.
Dist. Gir-Somnath, Gujarat, India
Tel.: (02876) 221861

Scanned with CamScanner

# विषयानुक्रमणिका


१. वैदिकव्याख्यायाः घटकतत्त्वपरिशीलनम् ०१-१०

प्रो. देवेन्द्रनाथः पाण्डेयः

२. काव्यशास्त्रीयः गुणविमर्शः ११-२०

डो. नरेन्द्रकुमार एल. पण्ड्या

३. 'रँ' प्रत्याहार-विमर्शः २१-३०

प्रो. विनोद कुमार झा

४. अमोघत्वं भवभूतेः ३१-३९

प्रो. अर्चना दुबे

५. मृच्छकटिके वर्णिता राज्ञः राज्यस्य च विभावना ४०-४५

डॉ. महेन्द्रकुमार अं. दवे

६. वैदिकवाङ्मये दीक्षाविचारः ४६-५०

डॉ. अमृतलालः भोगायता

७. भारतीयप्रतिभातत्त्वचिन्तपरिप्रेक्ष्ये राजशेखरदिशा प्रतिभा ५१-५९

डॉ. ललित पटेलः

८. वर्तमानसमये पर्यावरणसंरक्षणस्यावश्यकता तदर्थं वैदिकोपायाः ६०-६७

डॉ. शत्रुघ्नपाणिग्राही

९. वसंस्कृतसाहित्यदृष्ट्या धर्मः ६८-७२

डॉ. डायालाल एम. मोकरिया

१०. आयुर्वेददृष्ट्या आरोग्यप्राप्तौ आहार-विहारयोः योगदानम् ७३-८१

डॉ. पङ्कजकुमार एस्. रावलः


Scanned with CamScanner

११. ज्यौतिषशास्त्रे पर्यावरणविज्ञानम् ८२-८८
डॉ. रमेशचन्द्रबाबूलालशुक्लः
१२. आधुनिकसंस्कृते सङ्ख्याप्रयोगविमर्शः ८९-९६
डॉ. दीपेश विनोद कतिरा
१३. साधनचतुष्टयविमर्शः ९७-१११
डॉ. जानकीशरणः आचार्यः
१४. न्यायशास्त्रीयप्रकरणग्रन्थानां परिचयः ११२-१२१
बी. उमा महेश्वरी
१५. ज्यौतिषे कालस्वरूपम् १२२-१२८
उमाशंकर झा
१६. Deviations and Innovations Introduced in the भीष्मचरितम् By Dr. Hari Narayan Dikshit in Comparison to the महाभारत १२९-१३६
Dr. Kartik Pandya
१७. Open Access and Institutional Repository (IR) or Digital Library (DL) १३७-१४९
Ravindra Suryakant Kale
१८. મેદસ્વી બાળક : સમૃદ્ધિ કે સમસ્યા ? १५०-१५५
ડૉ. જ્યેશકુમાર ડી. મુંગરા

Scanned with CamScanner

# काव्यशास्त्रीयः गुणविमर्शः

✍ डो.नरेन्द्रकुमार एल.पण्ड्या

## आचार्याणां गुणविचाराः -

काव्योत्कर्षाधायकविशेषत्वेन आलङ्कारिकाः गुणविचारणां विदधति । काव्यलक्षणे अनेके आलङ्कारिकाः गुणतत्त्वं विनिर्दिशन्ति । भामहादयः पूर्वाचार्याः अपि गुणविचारणां अकुर्वन् । गुणः, अलङ्कारः, काव्यात्मा, काव्यशरीरम् इत्यादयः शब्दाः रूपकत्वेन प्रयुक्ताः दृश्यन्ते । काव्यशोभाधायकेषु तत्त्वेषु अलङ्काराः कटककुण्डलादिवत्, रसादिः आत्मा इत्यादयः प्रयोगविशेषाः दृग्गोचरीभवन्ति । तत्र स्थूलदृष्ट्या ज्ञायमानाः अलङ्काराः , सूक्ष्मबुद्धिग्राह्या गुणा इति अलङ्काराः बहिरङ्गाश्रिताः गुणा अङ्गिनमाश्रिताश्च इति विवेचकाः वदन्ति। काव्यपुरुषस्य शरीरस्थानीयशब्दार्थाश्रया अलङ्कारापेक्षया गुणानां सूक्ष्मबुद्धिग्राह्यत्वं विद्यते । गुणः, अलङ्कारः, लक्षणम्, इत्याद्या विभावनाः केन प्रयुक्ताः परिभाषिताश्चेति स्पष्टं नावगम्यते तथाऽपि भरतमुनेः नाट्यशास्त्रे एतेषां निर्देशः उपलभ्यते । भरतादारभ्य जगन्नाथान्ता आलङ्कारिकाः स्वस्वपद्धत्या गुणान् व्यचारयन्, तत्स्वरूपं सङ्ख्यां च निर्धारयितुं प्रायतन्त च ।

वामनाचार्यः गुणानां स्पष्टविभावनाया यशोधिकारी वर्तते । सः काव्यशोभाकरान् काव्यस्य नित्यधर्मान् गुणान् मन्यते , काव्यशोभातिशयहेतून् अनित्यधर्मान् अलङ्कारान् मनुते। गुणालङ्कारयोः नित्यधर्मत्त्वेन अनित्यधर्मत्त्वेन समवायसम्बन्धेन संयोगसम्बन्धेन काव्ये वृत्तिर्भवति । (अयं विचारः न्यायशास्त्रविचारधारप्रभावितो दृश्यते ।

उद्भटस्तु गुणासङ्कारयोर्भेदं नाङ्गीकुरुते, गड्डलिकाप्रवाहतुल्यं मन्यते । काव्यप्रकाशे अयं विचारः समुद्धृतो दृश्यते यथा - एवं च समवायवृत्त्या शौर्यादयः संयोगवृत्त्या तु हारादय इत्यस्तु गुणालङ्काराणां भेदः ओजःप्रभृतीनामनुप्रासादीनां चोभयेषामपि समवायवृत्त्या स्थितिरिति गड्डलिकाप्रवाहेणैवैषां भेदः इत्यभिधानमसत् ।

भरतमुनिना दश गुणाः प्रोक्ताः भामहेन त्रयो दर्शिताः , तत्राऽपि च तेन गुण इति

संज्ञया न निर्देशो विहितः। भरतमुनिः षोडशाध्याये दोषनिरूपणानन्तरं काव्यगुणान् निरूपयति। यतो हि गुणः काव्यशोभाधायकेषु रसोत्कर्षकेषु अन्यतमं साधनं मन्यते। भरतमुनिः गुणलक्षणं दोषाणां विपर्ययत्त्वेन अभावरूपतया दर्शयति , न तु भावत्त्वेन रूपेण (गुणा विपर्ययादेषाम्। भ.ना.१६.९५)

भरतोक्ता दश गुणाः श्लेषः, प्रसादः, समता, समाधिः, माधुर्यम्, ओजः, सौकुमार्यम्, अर्थव्यक्तिः, उदारता, कान्तिः इति संज्ञिताः सन्ति। दशगुणेषु शब्दगुणा अर्थगुणा इति भेदेन निर्देशः भरतमुनिना न कृतः। वामनाचार्यमते दश शब्दगुणा दश चाऽर्थगुणा इति स्पष्टं भेदनिरूपणं समुपलभ्यते। भामहः(२/१-३) करिकात्रय्यां संक्षेपेण गुणविचारणां प्रस्तौति। तत्र अर्थप्रतीतौ अनुकूलतया प्रतिकूलतया अल्पसमासत्त्वेन अनल्पसमासत्त्वेन रूपेण निरूपणं दृश्यते। भामहेन रीतिसन्दर्भे प्रसादर्जुताकोमलत्त्वश्रुति-पेशलत्त्वाग्राम्यत्त्वानाकुलत्त्वगुणाः उल्लिखिताः। एतेषु कतिपये अर्थगुणाः सन्ति (१/३४-३५) दण्डिना दश शब्दगुणाः सविस्तरं निरूपिताः। नामसाम्येऽपि लक्षणेषु पार्थक्यं वर्तते । दण्डी अलङ्कारशब्देन गुणालङ्कारयोरुभयोरपि स्वीकारं करोति । दण्डी दश शब्दगुणान् वैदर्भमार्गस्य प्राणभूतान् मन्यते। किन्तु इदं चिन्त्यं यत् वैदर्भमार्गस्य प्राणत्त्वेन कल्पितेषु दशसु गुणेषु समासभूयस्त्वात्मकं यद् ओजः तत्तु वैदर्भमार्गानुकूलं न प्रतिभाति। गौडमार्गे ओजोगुणः स्वीकार्यः ।

वामनाचार्यमते गुणालङ्कारसंस्कृतशब्दार्थरूपं काव्यम्। काव्यं ग्राह्यमलङ्कारात् (वा.का.सू.१.१.२) कव्यसौन्दर्यं गुणोपादानेन दोषापनोदनेन अलङ्कारग्राहणेन च भवति। (१.१.३) काव्यशोभाकराः शब्दार्थयोर्धर्माः गुणाः सन्ति । (ये खलु शब्दार्थयोर्धर्माः काव्यशोभां कुर्वन्ति ते गुणाः। ते च ओजःप्रसादादयः, वा.का.सू.३.१.१ इत्यत्र वृत्तिः)। काव्यशोभा गुणैः जन्यते अलङ्कारैरतिशेते। एतन्मते यद्यपि गुणाः शब्दार्थयोः धर्माः कथिताः तथाऽपि कामधेनुटीकायां गुणानां रीतिनिष्ठत्त्वं निरूपितम् , यथा- गुणा वस्तुतो रीतिनिष्ठा अपि उपचाराच्छब्दार्थधर्मा इति उक्तम् च।(का.सू.का.पृ.८३)

गुणाः सहृदयसंवेद्याः सन्ति, पाठधर्मरूपा न सन्ति यतो हि ते पाठे न भवन्ति किन्तु विशिष्टलक्षणसत्त्वासत्त्वाभ्यां गुणानां सत्त्वासत्त्वं निरूप्यते ।

भरतमुनेः दण्डिनश्च मते दश गुणाः सन्ति । गुणानां शब्दगुणाः अर्थगुणा इति भेदः तेषां मते स्पष्टो न भवति । वामनाचार्यमते दश शब्दगुणाः दश अर्थगुणाः इति सुस्पष्टं

Scanned with CamScanner

भेदनिरूपणं प्राप्यते । पदरचनायां विशिष्टत्वापादकाः गुणाः शब्दद्वारा अर्थद्वारा च वैशिष्ट्यं समर्पयन्ति , यथा- बन्धगाढत्वं काव्ये ओजस्वितां प्रकटयति तथैव अर्थस्य प्रौढिरपि काव्यं ओजस्वि करोति अत एव बन्धगाढत्वं शब्दौजः प्रौढिः अर्थौजः इत्युच्यते ।

वामनाचार्यस्य गुणविचारस्य गङ्गोत्री दण्डिनि न किन्तु तदपेक्षया अपि अग्रे क्वाऽपि सम्भवति यतो हि वामनाचार्यः स्वविचारान् समर्थयितुं अज्ञातेभ्यः स्रोतोभ्यः उद्धरणानि उपस्थापयति । (भा.सा.वि.प.पृ.४४९) वामनाचार्यस्य गुणविचारे इदं वक्तुं शक्यते यत् अत्र गुणानां आश्रयाश्रयिभावेनाभिनवनिरूपणं आविष्कृम्। उद्भटमते गुणालङ्कारयोः भेदः गड्डलिकाप्रवाहेण निरूपितो दृश्यते । उभयोरपि काव्यशोभाधायकत्वं समानम् इति अङ्गीक्रियते । रुय्यकेन एतद्विषये उक्तं यथा- उद्भटादिभिस्तु गुणालङ्काराणां प्रायशः साम्यमेव सूचितम् विषयमात्रेण भेदप्रतिपादनात्, सङ्घटनाधर्मत्वेन चेष्टेः । हेमचन्द्राचार्या अपि उक्तवन्तो यथा- तस्माद्गड्डलिकाप्रवाहेण गुणालङ्कारभेदः इति भामहविवरणे भट्टोद्भटोऽभ्यधात् । (का.शा.१/१३ इत्यत्र विवेकः) लोचनकारोऽपि आह यथा- सङ्घटनाया धर्माः गुणा इति भट्टोद्भटादयः(ध्व.३/६ इत्यत्र लोचनम्)

रुद्रटः काव्यगुणान् न चर्चयति किन्तु तट्टीकाकारः नमिसाधुः काव्यालङ्कारद्वितीयाध्याये निरूपितानि सुन्दरवाक्यलक्षणानि वाक्यगुणान् कथयति । तानि च अन्यूनाधिकम् , वाचकम् , सुक्रमम् , पुष्टार्थम् , शब्दचारु इति । नमिसाधुस्तु रीतयः शब्दगुणाः इत्याह यथा- एताश्च रीतयो नालङ्काराः , किं तर्हि शब्दाश्रया गुणा इति । (का.लं.रुद्रटकृते नमिसाधुः २/६) नमिसाधुमते वक्रोक्त्यादयः पञ्च शब्दगुणाः वास्तवादयः चत्वारः अर्थगुणाः, यथा- शब्दस्य वक्रोक्त्यादयः पञ्च गुणाः अर्थस्य पुनर्गुणा वास्तवादयः चत्वारः । (रु. का. लं. ११/१६ न. टी.)

आनन्दवर्धनाचार्यमते गुणा रसधर्माः,रसाश्रिताः,अलङ्काराः कटककुण्डलादिवत् शब्दार्थाश्रिताः । गुणानां अलङ्काराणां चोभयेषां आविर्भावः शब्दैर्जायते, तथाऽपि गुणानां वास्तविकः सम्बन्धः रसैः सह सहृदयसंवेद्यः । भामहाचार्येण गुणत्रयस्य निरूपणं न्यूनाधिकसमासरचनासन्दर्भेण कृतम्, आनन्दवर्धनाचार्यः चित्तस्य द्रुतिः दीप्तिः इत्याद्यवस्थाविशेषानुसन्धानेन गुणत्रयव्यवस्थां निर्दिशति । भरतस्य दश गुणाः वामनोक्ताश्च विंशतिर्गुणाः त्रिषु गुणेषु अन्तर्भवन्ति । एतेषु भरतादिप्रोक्तेषु दशसु विंशत्यां गुणेषु केचित् दोषाभावतया केचिच्च दोषत्वेन प्रोक्ताः ।

अभिनवगुप्तमते चित्तावस्थाः (द्रुत्याद्याः) एव गुणाः । ओजः दीप्तिरूपम्, प्रसादः समर्पकत्वरूपोऽथवा व्यापकत्वरूपः, द्रुतिरूपम् आर्द्रतात्मकं माधुर्यम् । ध्वनिवादे गुणानां रसैः सह व्याप्तिसम्बन्धः अस्ति । यत्र रसस्तत्रैव गुणाः, यत्र रसो नाऽस्ति तत्र गुणानां स्थितिर्न भवति। रसः कारणं गुणः कार्यम् इति रसगुणयोः कार्यकारणभावसम्बन्धः वर्तते। यथा- दीप्तिः प्रतिपत्तृहृदये विकासविस्तारप्रज्वलनस्वभावा। सा च मुख्यतः ओजःशब्दवाच्या । तदास्वादमया रौद्राद्याः तया दीप्त्या आस्वादविशेषात्मिकया कार्यरूपया वक्ष्यन्ते रसान्तरात्पृथक्तया । तेन कारणे कार्योपचारात् रौद्रादिरेवौजःशब्दवाच्यः। (ध्व.लो.२/९)

काव्येषु शब्दार्थानां तथा विनिवेशः विधीयते यथा तद्वाचनावबोधेन श्रवणेन च तत्तच्चित्तावस्थानिष्पत्तियोग्यता तेषु शब्दार्थेषु भवेत् । इत्थं च गुणाः मुख्यतः रसधर्माः सन्तोऽपि गौणत्वेन उपचारेण शब्दार्थधर्माः इत्यङ्गीकृतम् । गुणाः रसकार्यतया उपतिष्ठन्ते इति अभिनवगुप्तविचारः विश्वनाथेनाऽङ्गीकृतः। राजशेखरस्य काव्यमीमांसायां गुणौपादानिकसंज्ञकः अध्यायः न प्राप्यते। तेन तदीयः गुणविचारः नावगन्तुं शक्यः किन्तु पाठगुणविवेचने माधुर्यौजसोः उल्लेखः(का.मी.७) प्राप्यते। कुन्तकाचार्यमते सुकुमारविचित्रमध्यमाख्यानां त्रयाणां मार्गाणां सन्दर्भे गुणविचारो वर्तते । प्रत्येकं मार्गस्य चत्वारो गुणाः कथिताः। नामसाम्यं लक्षणानि पृथक् सन्ति । ते च गुणाः माधुर्यं, प्रसादः, लावण्यम्, आभिजात्यं चेति। क्षेमेन्द्रस्य कविकण्ठाभरणे चतुर्थसन्धौ काव्यगुणाश्चर्चिताः । ते सन्ति शब्दवैमल्यम्, अर्थवैमल्यम्, रसवैमल्यम् । शब्दार्थवैमल्यं पूर्वाचार्यैः निरूपितं रसवैमल्यमानन्दवर्धनाचार्यैर्निरूपितमस्ति। भोजराजमते त्रिधा गुणाः कथिताः, बाह्यः आभ्यन्तरः वैशेषिकश्च (स.क.१/६०)। ते क्रमेण शब्दगुणाः अर्थगुणाः विशेषपरिस्थित्यां दोषा गुणा भवन्ति ते वैशेषिकगुणाः। भोजेन चतुर्विंशतिः शब्दगुणाः चतुर्विंशतिः अर्थगुणा निरूपिताः। (भा.स.वि.प.पृ.४५९)

मम्मटाचार्यमते त्रयो गुणाः माधुर्यम्, ओजः, प्रसादश्च। अङ्गिनो रसस्य धर्माः अचलस्थितयः गुणाः रसधर्माः सन्ति तथाऽपि तेषां शब्दार्थधर्मत्वम् उपचारतः भवति। मम्मटाचार्याः आनन्दवर्धनाचार्यवत् त्रीन् गुणान् स्वीकुर्वन्ति, वामनाद्यभिमतान् दश गुणान् नाऽङ्गीकुर्वन्ति । तेषां स्वाभिमतेषु गुणेषु अन्तर्भावं कुर्वन्ति।

हेमचन्द्राचार्यस्य गुणनिरूपणं बहुधा मम्मटाचार्यानुसारि अस्ति। जयदेवेन

Scanned with CamScanner

गुणसामान्यलक्षणमदत्त्वैव गुणनिरूपणं चन्द्रालोकस्य चतुर्थमयूखे कृतम् । पौर्णमास्यां टीकायां काव्यधर्मत्वं गुणत्वम्, काव्योत्कर्षाधायकत्वम् अलङ्कारत्वम् लक्षणं निबद्धम् । जयदेवः वामनाद्यभिमतान् दशगुणाननुसृत्य अष्टौ गुणान् स्वीकरोति , कान्तिं अर्थव्यक्तिं च शृङ्गारे प्रसादगुणे च अन्तर्भावयति । जगन्नाथमते त्रयो गुणाः सन्ति माधुर्यम्, ओजः, प्रसादश्च । तदभिमतं गुणसामान्यस्वरूपं यथा- एवं तर्हि द्रुत्यादिचित्तवृत्तिप्रयोजकत्वं प्रयोजकतासम्बन्धेन द्रुत्यादिकमेव वा माधुर्यादिकमस्तु । एतन्मते चित्तवृत्तिप्रयोजकतया गुणानां निरूपणं दृश्यते । यथा- गुणानां चैतेषां द्रुतिदीप्तिविकासाख्यास्तिस्रः चित्तवृत्तयः क्रमेण प्रयोज्याः । तत्तद्गुणविशिष्टरसचर्वणाजन्या इति यावत् । (र.गं.) पण्डितराज-जगन्नाथमते शब्दार्थयोरपि माधुर्यमस्ति, इति तत्र उपचारो न कल्प्यते । यथा- तथा च शब्दार्थयोरपि माधुर्यादेरीदृशस्य सत्त्वादुपचारो नैव कल्प्य इति तु मादृशाः । (र.गं.)

**गुणलक्षणम् -**

**ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः ।**
**उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः ।।** (का.प्र.८/१)

एतच्च लक्षणं परिष्कृतं काव्यप्रदीपे यथा- रसस्योत्कर्षहेतुत्वे सति रसधर्मत्वम्, रसोत्कर्षहेतुत्वे सति रसाव्यभिचारिस्थितित्वम्, अयोगव्यवच्छेदेन रसोपकारकत्वं गुणत्वम् । रसधर्मत्वेऽपि माधुर्यादयो गुणाः समुचितैर्वर्णादिभिर्व्यज्यन्ते ।

**गुणप्रकाराः -**

**माधुर्यौजःप्रसादाख्यास्त्रयस्ते न पुनर्दश ।**
**आह्लादकत्वं माधुर्यं शृङ्गारे द्रुतिकारणम् ।।** (का.प्र.८/३)

तत्र किं नाम आह्लादकत्वम् इति काव्यप्रदीपे प्रोक्तं यथा- आह्लादकत्वं नाम आनन्दस्वरूपत्वम् । द्रुतिकारणं आह्लादस्वरूपत्वं ( आह्लादकत्वं) माधुर्यम् इति फलितं भवति ।

माधुर्यगुणविषये काव्यप्रदीपकारः लिखति यथा-

**गलितत्वमिवाह्लादपदव्या हृदये ददत् ।**
**माधुर्यं नाम शृङ्गारे प्ररोहं गाहते गुणः ।।**

अत्र गलितत्वमिव इत्यत्र मुख्यद्रवत्वासम्भवात् इव इत्युक्तम् । शौर्यक्रोधाद्याहितदीप्तत्व-विस्मयहासाद्याहितविक्षेपरित्यागेन चित्तस्य आर्द्रताख्यो

Scanned with CamScanner

नेत्राम्बुपुलकादिसाक्षिकः वृत्तिविशेषः द्रुतिः। तत्कारणं च सुखविशेषवृत्तिरूपाह्लादगतवैजात्यम्। तदेव माधुर्यम् इति भावः। (का.प्र.बा.८/६८)

**अतिशयमाधुर्यम् -**

करुणे विप्रलम्भे तच्छान्ते चाऽतिशयान्वितम्। (का.प्र.६९) अतिशयमाधुर्यं करुणादिषु क्रमेण भवति तत्र को हेतुरिति टीकायां स्पष्टीकृतं यथा- अतिशयान्वितत्वे हेतुमाह अत्यन्तद्रुतिहेतुत्वादिति। हास्यादेरप्यपगमेनातिद्रुतिहेतुत्वादित्यर्थः। इयाँस्तु विशेषः सम्भोगविप्रलम्भयोः तन्निःसपत्नं शान्ते तु जुगुप्साद्यन्वयादोजोलेशानुविद्धम् इति प्रदीपे स्पष्टम्। (का.प्र.बा.६९)

**ओजोगुणः**

**दीप्त्यात्मविस्तृतेर्हेतुरोजो वीररसस्थितिः।** (का.प्र.६९)

अत्र दीप्तिः इत्यनेन दीप्तिस्वरूपा या मनसो विस्तृतिर्ज्वलितत्वमिव। तथा च यद्वशात् ज्वलितमिव मनो जायते तदोजः इत्यर्थः इति प्रदीपः। विस्तृतिः द्रुतिविरोधिनी काचन वृत्तिश्चित्तस्य इत्युद्योतः। दीप्तिद्वेषविषयासङ्गेन द्रुतिविरोधी कश्चन धर्मः सैव विस्तृतिः। स्निग्धस्याऽपि सामाजिकचित्तस्य द्वेष्यात्मविषयविशेषसम्पर्केणोष्णता यथा सूर्यकान्तस्य सूर्यरश्मिसम्बन्धेन इति चक्रवर्तिनः।

**बीभत्सरौद्ररसयोस्तस्याधिक्यं क्रमेण च**(का.प्र.६९)

१) वीरस्य द्वेष्यनिग्राहे जिगीषामात्रम्

२) बीभत्से जुगुप्सितविषयेऽत्यन्तं त्यागेच्छा

३) रौद्रे तु अपकारिणि वधावधिकः प्रयासः इति क्रमेण वीरादिषु दीप्तेराधिक्यम्। जिगीषा-तितिक्षा-जिज्ञासारूपेण वीरादिषु दीप्तिः भवति। वीररौद्रयोः निष्प्रतिपक्षमोजः, बीभत्से माधुर्यलवानुविद्धम् इति विशेषः। हास्यभयानकाद्भुतेषु उभयोः एव माधुर्यौजसोःस्थितिरिति फलितम्।

१) तत्र हास्यादीनां शृङ्गाराङ्गविभावादिप्रभवत्वे माधुर्यं प्रधानम्, वीराद्यङ्गविभावादिप्रभवत्वे तु ओजः प्रधानम्।

२) हास्ये सर्वदैव प्रकृष्टं माधुर्यम्, स्वल्पमोजः, भयानकेऽद्भुते च ओजः प्रधानम्, स्वल्पं माधुर्यमिति केचित्। इत्थं व्याख्यातृभिः गुणानां प्राधान्याप्राधान्येनावस्थितिः दर्शिताऽस्ति।

Scanned with CamScanner

**प्रसादगुणः -**

**शुष्केन्धनाग्निवत् स्वच्छजलवत्सहसैव यत् ।**
**व्याप्नोत्यन्यत्प्रसादोऽसौ सर्वत्र विहितस्थितिः** ।।(का.प्र.७०-७१)

येन गुणेन रसाः सहसैव चित्तं व्याप्नुवन्ति स प्रसादः इति फलितोऽस्ति । अयं च प्रसादाख्यो गुणः सर्वेषु शृङ्गारादिषु रसेषु आधाराधेयवत्सम्बन्धेन सर्वासु पदसङ्घटनारूपासु रचनासु व्यङ्ग्यव्यञ्जकत्वसम्बन्धेन स्थितः इत्यर्थः । (का.प्र.बा.पृ.४७७)

**गुणानां शब्दार्थयोः वृत्तिः -**

गुणानां रसधर्मत्वे शब्दार्थयोर्मधुरादिव्यवहारः काव्यलक्षणे च सगुणौ शब्दार्थौ इत्युक्तं कथं सङ्गच्छते इत्यपेक्षायामाह यथा- गुणवृत्त्या पुनस्तेषां वृत्तिः शब्दार्थयोर्मता । (का.प्र.७३) आकारे शौर्यस्य (आकारोऽस्य शूरः) इव उपचारेण मधुरः शब्दः, मधुरः अर्थः, मधुरा रचना इति व्यवहारः । उपचारो नाम स्वव्यञ्जकतादिसम्बन्धेन लक्षणा । मुख्यवृत्त्या माधुर्यादयो रसवृत्तयः, गौणवृत्त्या गुणानां व्यञ्जकेषु सुकुमारादिवर्णेषु अर्थेषु रचनासु च प्रयोगः ।

**माधुर्यगुणघटना -**

मम्मटाचार्येण त्रयाणां गुणानां व्यञ्जकवर्णसमासरचनानिरूपणं कृतमस्ति । (१) टवर्गरहितानां स्वस्ववर्ग्यानुनासिकानां मूर्ध्नि संयोगः (२) ह्रस्वस्वरयुक्तः रेफवर्णः णकारश्च (३)समासरहिता रचना (४) मध्यमसमासयुक्ता रचना (५) मधुरा रचना

**यथोक्तम् -**

वर्णाः समासो रचना तेषां व्यञ्जकतामिताः ।(का.प्र.७३) वर्णसमासरचनानां गुणव्यञ्जकत्वमभिहितम् ।

**मूर्ध्नि वर्गान्त्यगाः स्पर्शा अटवर्गा रणौ लघू ।**
**अवृत्तिरल्पवृत्तिर्वा माधुर्ये घटना तथा** । ।(का.प्र.७४)

माधुर्यवती पदान्तरयोगेन रचना माधुर्यस्य व्यञ्जिका । पदान्तरयोगः सन्धिः यथा- अलं कुरु, अलङ्कुरु ,प्रतिमं तदङ्गम् , प्रतिमन्तदङ्गम् ।

माधुर्यवतीघटनाया उदाहरणम् -

Scanned with CamScanner

१) अनङ्गरङ्गप्रतिमन्तदङ्गं भङ्गीभिरङ्गीकृतमानताङ्ग्याः ।
कुर्वन्ति यूनां सहसा यथैताः स्वान्तानि शान्तापरचिन्तनानि ॥

२) लताकुञ्जं गुञ्जन्मदवदलिपुञ्जं तरलयन् समालिङ्गन्नङ्गं द्रुततरमनङ्गं प्रबलयन् ।
रजोवृन्दं विन्दन् दलितमकरन्दं चपलयन् मरुन्मन्दं मन्दं किरति मकरन्दं दिशि दिशि ॥

**ओजोगुणघटना -**

१) वर्गाणां प्रथमतृतीययोः क्रमेण द्वितीयटतुर्थाभ्यां संयोगः (२) रेफवर्णेन अन्यस्य वर्णस्य संयोगः (३) समानवर्णसंयोगः (४) अनुनासिकभिन्नटवर्गस्य व्यञ्जनानि (५) तालव्यः शकारः (६)मूर्धन्यः षकारः (७) दीर्घसमासा रचना (८) उद्धतगुम्फः विकटरचना

**यथोक्तम् -**

**योग आद्यतृतीयाभ्यामन्त्ययो रेण तुल्ययोः ।**
**टादिः शषौ वृत्तिदैर्घ्यं गुम्फ उद्धत ओजसि ॥** (का.प्र.७५)

उदाहरणं यथा-

चञ्चद्भुजभ्रमितचण्डगदाभिघातसञ्चूर्णितोरुयुगलस्य सुयोधनस्य ।
स्त्यानावनद्धघनशोणितशोणपाणिरुत्तंसयिष्यति कचांस्तव देवि भीमः ॥

**प्रसादगुणघटना**

१) श्रुतिमात्रेण शब्दाः समासाः रचना च अर्थप्रतीतिं जनयति , सा रचना प्रसादव्यञ्जिका । यथोक्तम्

**श्रुतिमात्रेण शब्दात्तु येनार्थप्रत्ययो भवेत् ।**
**साधारणः समग्राणां स प्रसादो गुणो मतः ॥** (का.प्र.७६)

उदाहरणं यथा- परिम्लानं पीनस्तनजघनसङ्गादुभयतस्तनोर्मध्यस्यान्तःपरिमिलनमप्राप्य हरितम् । इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः कृशाङ्ग्याः सन्तापं वदति बिसिनीपत्रशयनम् ॥

इत्थं माधुर्यौजःप्रसादगुणानां विशिष्टया रचनया अभिव्यक्तिः जायते । तासां व्यञ्जकरचनाविशेषेण क्वचित् क्वचित् अन्यथा निरूपणमपि दृश्यते । तदुक्तं यथा-

**वक्तृवाच्यप्रबन्धानामौचित्येन क्वचित् क्वचित् ।**
**रचनावृत्तिवर्णानामन्यथात्वमपीष्यते ॥** (का.प्र.७७)

Scanned with CamScanner

वक्रौचित्याद् एव रचनादीनामन्यथात्वम् यथा -

मन्थायस्तार्णवाम्भःप्लुतकुहरचलन्मन्दरध्वानधीरः कोणाघातेषु गर्जत्प्रलयघनघटान्योन्यसङ्घट्टचण्डः ।
कृष्णाक्रोधाग्रादूतः कुरुकुलनिधनोत्पातनिर्घातवातः केनाऽस्मत्सिंहनादप्रतिरसितसखो दुन्दुभिस्ताडितोऽयम् ॥

वाच्यौत्यात् एव रचनादीनामन्यथात्त्वम्

प्रौढच्छेदानुरूपच्छलनरयभवत्सैंहिकेयोपघातत्रासाकृष्टाश्वतिर्यग्वलितरविरथेनारुणेनेक्ष्यमाणम् ।
कुर्वत् काकुत्स्थवर्यस्तुतिमिव मरुतां कन्धरारन्ध्रभाजां भाङ्कारैर्भीममेतन्निपतति वियतः कुम्भकर्णोत्तमाङ्गम् ॥

(छलितरामनाटके पद्यमिदम्)

एवमिह वक्तृवाच्यौचित्यवशात् रचनाप्रकारे भिन्नता दृश्यते ।

इत्थं काव्यशास्त्रे आलङ्कारिकैः विद्व.द्भिः गुणस्वरूपस्य विमर्शः संक्षेपेण विस्तरेण वा कृतः अवलोक्यते । काव्ये गुणानां महत्त्वपूर्णस्थानम् अस्ति , तेन तत्स्वरूपाववोधः काव्यस्वरूपावगमने काव्यरचनाकौशले च महदुपकरोति इति वक्तुं शक्यते । अनेन निरूपणेन काव्यगुणानां किं स्वरूपं, कति प्रकाराः, कानि उदाहरणानि, का घटना, के वर्णाः तत्तद्गुणव्यञ्जकाः भवन्ति इत्यादयः प्रश्नाः समाहिता भवितुमर्हन्ति ।

***

## सन्दर्भग्रन्थाः

१. नाट्यशास्त्रम्, भरतमुनिः,संपा.पं.बटुकनाथशर्मा एवं पं.बलदेव उपाध्याय, चौखम्भा संस्कृतसंस्थान, वाराणसी, द्वितीयावृत्तिः१९८०
२. ध्वन्यालोकः, आनन्दवर्धनः,व्याख्याकारः- आचार्यविश्वेश्वरः, संपा. डो.नगेन्द्र, प्रका.ज्ञानमण्डल लिमिटेड,वाराणसी, २००६
३. ध्वन्यालोकः, आनन्दवर्धनः,संपा. नगीनदास परीख, गुजरातीसाहित्यपरिषद्, अहमदाबाद, द्वितीयावृत्तिः २००४
४. काव्यप्रकाशः, बालबोधिनीसहितः, संपा.बनहट्टी नारायण, परिमल पब्लिकेशन,दिल्ली,पुनर्मुद्रणम्-२००८
५. काव्यानुशासनम्, आचार्यहेमचन्द्राचार्यकृतम्, संपा. टी. एस.नान्दी, एल.डी.इन्स्टीट्युट ओफ

Scanned with CamScanner

इन्डोलोजी, अहमदाबाद, २०००

६. रसगङ्गाधरः, संपा.थानेशचन्द्र उप्रैति, परिमल पब्लिकेशन, दिल्ली, १९८९

७. काव्यप्रदीपः, गोविन्दप्रणीतः, संपा. पं.दुर्गाप्रसादः एवं वासुदेव लक्ष्मणशास्त्री पणशीकर, चौखम्भा संस्कृतसंस्थान, वाराणसी, पुनर्मुद्रणम्-१९८२

८. भारतीयसाहित्यशास्त्रनी विचारपरंपराओ, डो.तपस्वी नान्दी, युनिवर्सिटी ग्रान्थनिर्माणबोर्ड-गुजरातराज्य, अहमदाबाद, द्वितीयावृत्तिः१९८४

***

Scanned with CamScanner